द्दिनान्ते त्रिधा विभक्तदिनतृतीयभागे दिवोत्थानमित्यनुरोधात् । अतएव ।

"रात्रौ विशोधौ विनिरुन्ति पौरान्
स्वापो दिवा राष्ट्रकुलं नृभर्त्तुः ।
सन्ध्याद्वये स्वप्नफला धरित्री
भवेन्नराणामपि रोगदुःखम् ॥"

इति श्रुतिः ॥ वराहपुराणे ।
"द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे ।
आ-भा-का-सितपक्षेषु शयनावर्त्तनादिकम् ॥"

तदेवं शयनादौ कालचतुष्टयम् । द्वादश्यां निशादौ नक्षत्रयोगः । तदभावेऽपि निशाद्यनादरेण तिथ्यन्तरे पादयोगः । तस्याप्यभावेऽपि सन्ध्यायां नक्षत्रमात्रयोगः तस्याप्यभावे द्वादश्यां सन्ध्यायामिति । विष्णुधर्म्मोत्तरे ।
"किं तस्मैत्राद्यपादेन दशम्यंशेन यो दिवा ।
पौष्णशेषेण किं तेन प्रतिपद्यथ यो निशि ॥"
इति दशमीप्रतिपदोर्निषेधात् एकादश्यादिपौर्णमास्यन्तानां तिथीनामभ्यनुज्ञानम् ॥*॥ पद्मपुराणे सर्व्वदेवशयनादिकमुक्तं यथा,—
"प्रतिपद्धनदस्योक्ता पवित्रारोहणे तिथिः ।
श्रिया देव्या द्वितीया तु तिथीनामुत्तमा स्मृता ॥
तृतीया तु भवान्याश्च चतुर्थी तत्सुतस्य च ।
पञ्चमी सोमराजस्य षष्ठी प्रोक्ता गुहस्य च ॥
सप्तमी भास्करस्योक्ता दुर्गायाश्चाष्टमी स्मृता ।
मातॄणां नवमी प्रोक्ता दशमी वासुकेस्तथा ॥
एकादशी ऋषीणान्तु द्वादशी चक्रपाणिनः ।"
चक्रपाणिन इति पदव्यवहार इत्यस्मात् ।
"त्रयोदशी त्वनङ्गस्य शिवस्योक्ता चतुर्द्दशी ।
मम चैव मुनिश्रेष्ठ पौर्णमासी तिथिः स्मृता ॥
यस्य यस्य तु देवस्य यच्चक्षं तिथिश्च या ।
तस्य देवस्य तस्मिंश्च शयनावर्त्तनादिकम् ॥"
अत्र हरिशयनाद्याषाढ़ादिविधानात् तत्साहचर्य्यादन्येषामपि तथा । ज्योतिषेऽपि ।

"व्रजति यदा मिथुनं विहाय
कर्कं राजविवर्ज्जितां तिथिं सूर्य्यः ।
भवति तदा नियतं हिराषाढ़ः
सुरशयनादिविधिर्हितीये मासि ॥"

राज्ञा चन्द्रेण विवर्ज्जितां अमावास्याम् । पूर्व्वकृष्णपक्षे मिथुने संक्रान्ते इति शेषः । हरिनाथोपाध्यायास्तु । यमः ।
"क्षीराब्धौ शेषपर्य्यङ्के आषाढ्यां संविशेद्धरिः ।
निद्रां त्यजति कार्त्तिक्यां तयोस्तं पूजयेत् सदा ॥
ब्रह्महत्यासमं पापं क्षिप्रमेव व्यपोहति ।
हिंसात्मकैश्च किं तस्य यज्ञैः कार्य्यं महात्मनः ।
प्रस्वापे च प्रबोधे च पूजितो येन केशवः ॥"
आषाढ़शुक्लैकादशीमारभ्य पौर्णमासीपर्य्यन्तं विष्णोर्निद्राप्रकृष्टरूपशयनसमयः । अतएव एकादश्यां शयनमभिधाय तदादिदिनपञ्चके अर्घ्यकथनं ब्रह्मपुराणे । वराहपुराणेऽपि तु । एकादशीकालीनमन्त्रे निद्राप्रकृष्टाभिधानम् । यमस्मृतौ पौर्णमास्यां शयनाभिधानम् । आषाढ़ीपदस्यानुपाधेस्तत्रैव प्रवृत्तेः । एतच्च ब्रह्मपुराणे यद्यप्येकादश्यां प्रबोधसमयः । तेन वराहपुराणे द्वादश्यां प्रबोधाभिधानम् । यमस्मृतौ कार्त्तिक्यां प्रबोधाभिधानम् सर्व्वसमञ्जसमिति । एवमेव श्रीदत्तोपाध्यायाः । कल्पतरुस्तु एकादश्यामेव शयनं प्रबोधश्च । यमस्मृतावाषाढ़ी कार्त्तिकस्येयमिति व्युत्पत्त्या न तत्प्रत्ययानुपपत्तिः । अपवादविषयके कचिदुत्सर्गप्रवृत्तेरित्याह । श्रीभगवद्वाक्यम् ।
"मच्छयने मदुत्थाने मत्पार्श्वपरिवर्त्तने ।
फलमूलजलाहारी हृदि शल्यं समर्पयेत् ॥"
फलाहारपदमनशनपरम् । तेन सर्व्वथा अनशनपरत्वम् । इत्येकादशीतत्त्वम् ॥ * ॥
मर्त्यानां शयनविधिनिषेधौ यथा,—

सूत उवाच ।

"उपास्य पश्चिमां सन्ध्यां हुत्वाग्नींस्तानुपास्य च
भृत्यैः परिवृतो भुक्त्वा नातितृप्तोऽथ संविशेत् ॥
शुचिं देशं विविक्तन्तु गोमयेन तु लेपयेत् ।
प्रागुदक्प्रवणे चैव संस्वपेत सदा बुधः ॥
प्राक्शिराश्च स्वपेन्नित्यं तथा वै दक्षिणाशिराः ।
स्वपेदुदक्शिरा नैव तथा प्रत्यक्शिरा न च ।
न चान्तर्वानहीने तु न तिर्य्यक् च कदाचन ॥
शून्यालये श्मशाने तु एकवृक्षे चतुष्पथे ।
महादेवगृहे चापि मातृवेश्मनि न स्वपेत् ॥
न यक्षनागायतने स्कन्दस्यायतने तथा ।
गर्भेषु च विना दीक्षां न स्वपेच्च कथञ्चन ॥
धान्यगेहे च विप्राणां गुरूणाञ्च तथोपरि ।
नाशुचौ पर्णकीर्णे तु नाशुचिर्नाशिखस्तथा ॥
दिने सन्धौ न नग्नश्च नोत्तरापरमस्तकः ।
आकाशे पर्व्वते शून्ये न च चैत्यद्रुमे तथा ॥
न तु दार्व्वम्भसाकीर्णे नार्द्रपादस्त्वधावितः ।
पालाशे शयने नैव बहुदारकृते न च ॥
न दग्धे विद्युता चैव वह्निसृष्टे जले तथा ।
न स्वपेत् सन्ध्ययोर्नित्यं न शिरस्यासने कटे ॥
एवं स्वपन् नरो नित्यं सुखस्येह परत्रभाक् ।
व्यत्यये च भवेद्दुःखी ततो नरकमश्नुते ॥"
इति वह्निपुराणे आह्निकतपोनामाध्यायः ॥*॥
अपि च । सति सूर्य्ये शय्या च न पातनीया सूर्य्योदयात् पूर्व्वमुत्तोलनीया । तथा च स्मृतिः ।
"भास्करादृष्टशय्यानि नित्याग्निसलिलानि च ।
सूर्य्यावलोकदीपानि लक्ष्म्या वेश्मानि भाजनम् ॥
आसनं वसनं शय्या जायापत्यं कमण्डलुः ।
आत्मनः शुचिरेतानि न परेषां कदाचन ॥"
न कदाचन इत्यनुमतिं विना अन्यथातिव्याप्त्यनुपपत्तेः । व्यासः ।
"शुचौ देशे विविक्ते तु गोमयेनोपलिप्तके ।
प्रागुदक्प्रवने चैव संविशेत्तु सदा बुधः ॥
माङ्गल्यं पूर्णकुम्भञ्च शिरःस्थाने निधापयेत् ।
वैदिकैर्गारुडैर्मन्त्रै रक्षां कृत्वा स्वपेत्ततः ॥"
गर्गः ।
"स्वगृहे प्राक्शिराः शेते आयुष्ये दक्षिणाशिराः ।
प्रत्यक्शिराः प्रवासे तु न कदाचिदुदक्शिराः ॥"
मार्कण्डेयपुराणे ।
"प्राक्शिराः शयने विद्यात् धनमायुश्च दक्षिणे ।
पश्चिमे प्रबलां चिन्तां हानिं मृत्युं तथोत्तरे ॥"
तथा ।
"नमस्कृत्याव्ययं विष्णुं समाधिस्थः स्वपेन्निशि ।"
मार्कण्डेयः ।
"शून्यागारे श्मशाने च एकवृक्षे चतुष्पथे ।
महादेवगृहे चापि शर्करालोष्टपांशुषु ॥
धान्यगोविप्रदेवानां गुरूणाञ्च तथोपरि ।
न चापि भग्नशयने नाशुचौ नाशुचिः स्वयम् ॥
नार्द्रवासा न नग्नश्च नोत्तरापरमस्तकः ।
नाकाशे सर्व्वशून्ये च न च चैत्यद्रुमे तथा ॥"
न स्वपेदित्यर्थः । इत्याह्निकाचारतत्त्वम् ॥*॥
अन्यच्च ।
"भुक्त्वा च विधिवन्मन्त्रैर्द्विजो भुक्तावशिष्टकम् ।
सत्सुहृद्बान्धवजनः स्वपेत् शुष्कपदो निशि ॥
नोत्तराभिमुखः स्वप्यात् पश्चिमाभिमुखो न च ।
न चाकाशे न नग्नो वा नाशुचिर्नासने क्वचित् ॥
न शीर्णायान्तु खट्वायां शून्यागारे न चैव हि ।
नापि वंशे च पालाशे शयने वा कदाचन ॥"
इति कौर्म्मे उपविभागे १८ अध्यायः ॥*॥
अपि च ।
"कृतपादादिशौचश्च भुक्त्वा सायं ततो गृही ।
गच्छेत् शय्यां समस्फाद्य अथवा दारुनिर्म्मिताम्
शाल्मलस्य कदम्बस्य नीपमन्दारकस्य च ।
किंशुकस्य वटस्याथ तथा कुशमयस्य च ॥
आरोहणाद्‌ भवेत् पापं तस्मात्तेषु न च स्वपेत् ।
प्ररोहशय्यां सूत्रे वा अपर्णे परमेश्वरि ! ॥
न शुक्रे नापवित्रे च न तृणे न च भूतले ।
तूलिकायां तथा वस्त्रे शय्याभावे स्वपेद्गृही ।
स्वपेच्च पट्टवस्त्रे च कलशे कम्बलेषु च ॥"
इति मत्स्यसूक्ते ४४ पटलः ॥*॥
अपि च ।
"सूर्य्येणाभ्युदितो यस्तु त्यक्तः सूर्य्येण यः स्वपन्
अन्यत्रातुरभावाच्च प्रायश्चित्तीयते नरः ॥"
इति विष्णुपुराणे ३ अंशे ११ अध्यायः ॥
यस्मिन् सुप्ते सूर्य्य उदेति स सूर्य्येणाभ्युदितः । यस्मिन् सुप्ते अस्तं याति स सूर्य्येण त्यक्तः । सूर्य्योदयास्तसमययोः स्वपन् प्रायश्चित्तीयते पातकी भवेदित्यर्थः । इति तस्य टीका च ॥
किञ्च ।
"श्वासानष्टौ समुत्तानस्तान् हि १६ पार्श्वे च दक्षिणे ।
ततस्तद्द्विगुणान् ३२ वामे पश्चात् स्वप्यात् यथासुखम् ॥
वामदिशायामनलो नाभेरूर्द्ध्वेऽस्ति जन्तूनाम ।
तस्मात्तु वामपार्श्वे शयीत भुक्तप्रपाकार्थम ॥"
इति भावप्रकाशः ॥